
दवात पूजन



खेमराज श्रीकृष्णदास प्रकाशन, बम्बई

अथ

दवातपूजनम्

प्रारभ्यते ।

संस्करण- सन् १९९४, सम्वत् २०५१

मूल्य २ रुपये मात्र

Printed by Shri Sanjay Bajaj for M / s Khemraj Shrikrishnadass proprietors Shri Venkateshwar press Bombay-400 004. at their Shri Venkateshwar press, 66, Hadapsar Industrial Estate, Pune-411013.

श्रीगणेशाय नमः ॥ अथ दवातपूजनम् ॥
आचम्य प्राणानायम्य। सुमुखश्चैकदंतश्चेत्यादि गणपतिस्मरणं विधाय संकल्पं कुर्यात्। ॐतत्सद्द्येत्यादि अमुकगोत्रः अमुकशर्माऽहं यमादिप्रीतिद्वारा सर्वारिष्टनिवृत्तिपूर्वकं सर्वाभीष्टफलप्राप्त्यर्थमायुरारोग्यैश्वर्याभिवृद्ध्यर्थं लाभक्षेमार्थं च यमद्वितीयाप्रयुक्तयमधर्मराजचित्रगुप्तलेखनीमसीपात्रयमदूतानामास्मिन्पीठे स्थापनं पूजनं च करिष्ये। इति संकल्प्य। प्रथमं गणपतिपूजनम्। गणानां त्वा गणपति ँ हवामहे प्रियाणांत्वा प्रियपति ँ हवामहे निधीनांत्वा निधि-

॥२॥ पति ७ हवामहे व्वसो मम॥ आहमजानिगर्भध-
मात्वमजासि गर्भधम् ॥ १ ॥ गणपतये नमः
आवाहनं समर्पयामि । आसनं स० । पाद्यं स० ।
अर्घ्यं स० । आचमनं स० । वस्त्रं स० । गन्धं स० ।
अक्षतान् स० । पुष्पाणि स० । धूपं स० । दीपं
स० । नैवेद्यं स० । आचमनं स० । फलं स० ।
तांबूलं स० । दक्षिणां स० । आरार्तिकं स० । मंत्र-
पुष्पाञ्जलिं स० । नमस्कारं स० ॥

अथ मसिपूजनम्॥ सद्यश्छिन्नशिरः कृपाणमभयं
हस्तैर्वरं बिभ्रतीं घोरास्यां शिरसां स्रजा सुरुचिरा- ॥२॥
मुन्मुक्तकेशावलिम् । सृक्काऽसृक्प्रवहां श्मशान-

निलयां श्रुत्योः शवालंकृतिं श्यामाङ्गीं कृतमेखलां
शवकरैर्देवीं भजे कालिकाम्॥ १॥ इति ध्यात्वा।
मसि त्वं लेखनीयुक्तचित्रगुप्तशयस्थिता ॥ सद-
क्षराणां पत्रे च लेख्यं कुरु सदा मम ॥ १ ॥ या
माया प्रकृतिः शक्तिश्चंडमुंडप्रमर्दिनी॥ सा पूज्या
सर्वदेवैश्च अस्माकं वरदा भव ॥ २ ॥ जातवेदसे
सुनवामसोममरातीयतो निदहाति वेदः ॥ स नः
पर्षदति दुर्गाणि विश्वा नावेव सिंधुं दुरितात्यग्निः॥
मस्यै नमः।आवाहनादिपूजनं कृत्वा। ततो नाम-
पूजा । महाकाल्यै नमः।कपालिन्यै नमः। कुल्लायै
नमः । कुरुकुल्लायै नमः। विरोधिन्यै नमः। विप्र-

चित्तायै नमः।उग्राय नमः। दाप्ताय नमः। नीलायै नमः। यमायै नमः। बलाकायै नमः। मात्रे नमः। मुद्रायै नमः। महाकाल्यै नमः। रत्नायै नमः। आवाहनादिपूजनम्। पुष्पाञ्जलिं समर्प्य। या कालिका रोगहरी सुवंद्या वेश्यानुकूलैर्मदनातुरैश्च। जनैर्जनानां भयहारिणी च सा देवमाता मयि सौख्यदात्री॥ १॥इति मंत्रपुष्पांजलिं समर्पयामि।

ततो लेखनीपूजा॥ शुक्लां ब्रह्मविचारसारपरमा-माद्यां जगद्व्यापिनीं वीणापुस्तकधारिणीमभ-यदां जाड्यांधकारापहाम्॥ हस्ते स्फाटिकमा-लिकां विदधतीं पद्मासने संस्थितां वंदे तां परमे

श्वरीं भगवती बुद्धिप्रदां शारदाम् ॥ १ ॥ इति
ध्यात्वा-कृष्णानने द्विजिह्वे च चित्रगुप्तकरास्थिते॥
सदक्षराणां पत्रे च लेख्यं कुरु सदा मम ॥ १ ॥
पतीनकानसरस्वती वाजेभरीवाजीनीव पत्तीयज्ञं
विष्टधीयसुः॥ लेखन्यै नमः। आवाहनादि पूजनम्॥
ततो नामपूजनम् ॥ सरस्वत्यै नमः। ब्रह्माण्यै
नमः। भारत्यै नमः। भाषायै नमः। गिरे नमः।
वाचे नमः। वाण्यै नमः। हंसगमनायै नमः।
पद्महस्तायै नमः। शारदायै नमः॥ ततो गंधादि-
पूजनम् ॥ पुष्पांजलिम्-कृष्णानने कृष्णजिह्वे
चित्रगुप्तशयस्थिते॥ पुष्पांजलिं गृहाण त्वं सदैव

वरदा भव ॥ १ ॥ अथ प्रार्थना—या कुन्देन्दुतुषार-
हारधवला या शुभ्रवस्त्रावृता या वीणावरदंड-
मंडितकरा या श्वेतपद्मासना ॥ या ब्रह्माच्युत-
शंकरप्रभृतिभिर्देवैः सदा वंदिता सा मां पातु सर-
स्वती भगवती निःशेषजाड्यापहा ॥ १ ॥ तरुण-
शकलमिंदोर्बिभ्रती शुभ्रकांतिः कुचभरनमि-
तांगी सन्निषण्णा सिताब्जे ॥ निजकरकमलोद्य-
लेखनीपुस्तकश्रीः सकलविभवसिद्ध्यै पातु
वाग्देवता नः ॥ २ ॥

अथ चित्रगुप्तपूजनम् ॥ अथ ध्यानम् । किरीटो-
ज्ज्वलं वस्त्रभूषाभिरामं विचित्रासनासीनमिंदु-

प्रभासम् ॥ नृणां पापपुण्यानि पत्रे लिखन्तं भजे चित्रगुप्तं सखायं यमस्य ॥ इति ध्यात्वा । अक्षतान् गृहीत्वा।मसिभाजनसंयुक्तं ध्यायते च महाबलम्॥ लेखनीकटिकाहस्तं चित्रगुप्तं नमाम्यहम् ॥ १ ॥ चित्रगुप्त नमस्तुभ्यं लेखकाक्षरदायक ॥ कायस्थजातिवंशाद्य चित्रगुप्त नमोऽस्तु ते ॥२॥ चित्रावसो स्वस्ति ते पारमशीय॥ ॐ नमः चित्राय धर्मलेखकाय यमवाहिकाधिकारिणे पल्व्युं जन्मसंपत्प्रलयं कथय २ स्वाहा ॥ चित्रगुप्ताय नमः । आवाहनादिपूजनम् । ततो नामपूजा । श्रीवास्तव्याय नमः । पांचालाय नमः । नागराय

नमः । शाकटाय नमः । गौडवाय नमः । माथु-
राय नमः । बंगालाय नमः । नैगमाय नमः । ततो
रक्तपुष्पैश्च वस्त्रैश्च रक्तचंदनमिश्रितैः गंधादिपूज-
नम् । पुष्पाञ्जलिम् । श्रिया सह समुत्पन्न समुद्र-
मथनोद्भव । चित्रगुप्त महाबाहो ममायुर्वरदो
भव ॥ उत्पत्तिं प्रलयं चैव भोगदानकृताकृतैः ॥
लेखकस्त्वं सदा श्रीमन् चित्रगुप्त नमोऽस्तु ते
॥ १ ॥ चित्रगुप्त नमस्तुभ्य चातुर्वर्ण्यबहिष्कृतः ॥
पुष्पाञ्जलिं गृहाण त्वं प्रसीद परमेश्वर ॥ २ ॥

ततो यमपूजा ॥ ध्यानम् । पाथःसंयुतमेघसन्निभ-
वपुः प्रद्योतनस्यात्मजो नृणां पुण्यकृतां शुभावह- ॥५॥

वपुः पापीयसां दुःखकृत् ॥ श्रीमद्दक्षिणदिक्पति-
र्महिषगो भूषांबरालंकृतो ध्येयः संयमिनीपतिः
पितृगणस्वामी यमो दंडभृत ॥ इति ध्यात्वा ।
धर्मराज नमस्तुभ्यं नमस्ते यमुनाग्रज॥ त्राहि मां
किंकरैः सार्द्धं सूर्यपुत्र नमोऽस्तु ते ॥ १ ॥ यमाय
त्वा मखाय त्वा सूर्यस्य त्वा तपसे ॥ देवस्त्वा
सविता मध्वानक्तु पृथिव्यास्पृशस्पाहिस्स ७ ॥
अर्चिरसि शोचिरसि तपाऽसि ॥ ॐ क्रों ह्रीं आं वैं
वैवस्वताय धर्मराजाय भक्तानुग्रहकृते नमः ॥
आवाहनादिपूजनम्॥नामपूजा।धर्मराजाय नमः।
कृतांताय नमः। रविपुत्राय नमः । पितृपतये

नमः । कलिंदजासोदराय नमः । समवर्तिने नमः।
वैवस्वताय नमः । कालाय नमः । ततो गंधादि-
पूजनम् । पुष्पाञ्जलिं दद्यात् । उत्पत्तिं प्रलयं चैव
भोगदानकृताकृतैः ॥ लेखकस्त्वं सदा श्रीमन्
धर्मराज नमोऽस्तु ते ॥ १ ॥ एह्येहि वैवस्वत धर्म-
राज सर्वामरैरर्चित धर्ममूर्ते ॥ शुभाशुभानां फल
भावनस्त्वं गृहाण पूजां भगवन्नमस्ते ॥ इति
प्रार्थनामंत्रः । एह्येहि मार्तंडजया सहस्त्वं यमां-
तकालोकधरा महेंद्राः॥भ्रातृद्वितीयाकृतदेवपूजां
गृहाण चार्घ्यं भगवन्नमस्ते ॥ १ ॥ यमस्वस्रे नम-
स्तेऽस्तु यमुने लोकपूजिते॥ वरदा भव मे नित्यं

सूर्यपुत्रि नमोऽस्तु ते ॥ २ ॥ ततो नीराजनम् ।
श्रिये जातः श्रिय आनिरियाय श्रियं वयो जरि-
तृभ्यो दधाति ॥ श्रियं वसाना अमृतत्वमायन्
भवंति सत्या समिथा मितद्रौः ॥ १ ॥ पत्रं पुष्पं
फलं तोयं यो मे भक्त्या प्रयच्छति ॥ गृहाणार्घ्यं
मया दत्तं देहि मे वांछितं फलम् ॥ रूपं देहि जयं
देहि भाग्यं भवति देहि मे ॥ पुत्रान्देहि धनं देहि
सर्वान् कामांश्च देहि मे ॥ १ ॥ मसिपूजन
कृतस्य विधेर्यन्न्यूनमतिरिक्तं तत्सर्वं ब्राह्मणानां
वचनात् गणेशाम्बिकयोः प्रसादात्सम्पूर्णमस्तु ॥
इति वेदोक्तदवातपूजनं समाप्तम् ॥

दोहा—सब सामग्री साजके, पूजे शेठ दवात ।
विधिपूर्वक संकल्प कर, जोडे दोनों हाथ ॥ १ ॥
उत्तम लाल बनातको, आसन लियो बिछाय ।
जोसी बैठे जुगतिसे, मंत्र पढें द्विजराय ॥ २ ॥
शेठ कहें सुन विप्रजी, भेंट करूं भरपूर ।
ऐसे मंत्र उचारिये, दुख दरिद्र हो दूर ॥ ३ ॥
भेंट लेय भूदेवजी, आशीर्वाद सुनाय ।
सदा कलम चलती रहे, सुखसंपति अधिकाय ॥ ४ ॥

इति दवातपूजनं समाप्तम् ।

पुस्तकें मिलने के स्थान

१) खेमराज श्रीकृष्णदास,
श्रीवेंकटेश्वर स्टीम् प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
खेतवाडी, बम्बई - ४००००४

२) खेमराज श्रीकृष्णदास,
६६, हडपसर इण्डस्ट्रिअल इस्टेट
पुणे - ४११०१३

३) गंगाविष्णु श्रीकृष्णदास
लक्ष्मीवेंकटेश्वर स्टीम प्रेस,
व बुक डिपो,
अहिल्याबाई चौक, कल्याण
(जि.ठाणे- महाराष्ट्र)

४) खेमराज श्रीकृष्णदास,
चौक - वाराणसी (उ.प्र.)

इति

दवातपूजनम्

समाप्तम् ।

मुद्रक एवं प्रकाशकः

खेमराज श्रीकृष्णदास,

अध्यक्ष : श्रीवेंकटेश्वर प्रेस,

खेमराज श्रीकृष्णदास मार्ग, बम्बई-४०० ००४

KHEMRAJ SHRIKRISHNADASS